ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. IX Oct,2016 - Mar,2017 No.2

वर्षम् – ९, अक्टूबर २०१६ – मार्च २०१७, अङ्कः – द्वितीयः

# प्राचीसुधा

# *PRACI SUDHA*

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

डॉ.विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
PURI, ODISHA

# आचार्यभरतानुसारं "नाट्याभिनयः"

डॉ. महेन्द्रकुमार अ. दवे

नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायं ग्रन्थं प्रवक्ष्यामिति । "नाट्यवेदः नाट्यशास्त्रम्" इति पर्यायौ । तद् ग्रन्थस्येदानीं करणम् । न तु प्रवचनम् । तद्धि व्याख्यानरूपं करणादभिन्नं कठेन प्रोक्तमिति यथा । ग्रन्थस्य च नाट्यवेदत्वे उत्पत्त्यादिपञ्चकस्य तद्गतस्यान्यग्रन्थसाधारण्यात् प्रश्नासङ्गतिः । उत्तर ग्रन्थस्यानुपपत्तिः – "दृश्यं श्रव्यं च यद् भवेत् ।" (नाट्यशास्त्रम् – १/११), "जग्राह पाठ्यमृग्वेदात् ।" (नाट्यशास्त्रम् – १/१७) इत्यादेर्ग्रन्थं प्रत्यसङ्गतत्वात् । तस्मात् नाट्यं च तच्छास्त्रञ्च । सर्वेषु सामुहिकसमारम्भेषु यज्ञ-संस्कार-देवार्जन-युद्धादिषु यज्ञादिमाङ्गलिककार्येषुत्सवेषु च लोकानाम् विनोदो गीतवाद्याभिनयादिभिः सम्पादितः । अपरं विश्रामकालं सानन्दं व्यत्येतुं मनोविनोदाः श्रेष्ठसाधनानि समीहिताः । कतिपय मनोविनोदानामुपयोगिस्वरूपाणि प्रश्यस्यानि सन्ति[१] ।

सकलहितकरणप्रवृत्त उत्साहसम्पदोपेतस्तदभिवृद्धये तत्प्रत्यूहापसिसारयिषया स्वविज्ञानक्रमोपारूढ गुरुरूपब्रह्मसर्वाधिपति परमेश्वरविषयां स्मृत्यौत्सुक्यधृतिमत्यादि लक्षणां व्यभिचारसरणिं बाह्यकरणीयविषयं च जडतावहित्यप्रभृतिभावगणं पुरस्सरीकृत्य धर्मवीरानुप्रविष्ट स्तदुचिताङ्गिक वाचिकानुभाव प्रकटनपूर्वं स्वप्रवृत्तिप्रयोजनमेव निरूपयति । प्रयोजनस्यैव प्रवर्तकत्वात् यदाहुः – "यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्"[२] । तथाहि वनविहार-जलविहार-मल्लयुद्ध-मृगयादिकं स्वास्थ्यसम्वर्धनाय, नृत्य-संगीत-वाद्याभिनय-कथादिकं कलाविलासाय, समाज-गोष्ठी-वसन्तोत्सव-कौमुदीमहोत्सवादिकं नागरिकाताया विकासाय च बभूवुः । नाट्याभिनये बहुविधमनोविनोदानामन्तर्भावो वर्तते । संस्कृत्या सह नाट्यस्य समारम्भो बीजरूपेण कल्पितुं शक्यते । सर्वप्रथमं वैदिककाले नाट्याभिनयस्य कतिप यज्ञेषु विधानमासीत् । तथाहि राजसूययज्ञे गविष्टिमभिनयन् यजमानो राजा सम्बन्धिनमपि राजानं प्रत्याक्रमणं कृतवान्[३] । विष्णोर्वामनरूपेणासुराणां छलनं विदितमेव । वैदिकशैलूषा नाटकपात्राण्येव प्रतिभान्ति[४] । पाणिनिना नटसूत्राणां कतिपयरूपकाणां चोल्लेखः कृतः । परवर्त्तियुगेऽपि सदैव नाट्यप्रवृत्तिः समवर्ततः । भरतमुनिना चतुश्रु वेदेषु नाट्ये आवश्यकानि तत्त्वानि नीत्वा नाट्यवेदस्य रचना कृता । यथा –

जग्राहपाठ्यं ऋग्वेदात्, सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानथर्वणादपि ।।[५]

ऋग्वेदात् पाठ्यं नीत्वा सामभ्यो गीतं तत्र "गीतं प्राणाः प्रयोगस्य" इति वक्ष्यमाणत्वात् । एवकारेण गीतमात्रं ततो गृहीतं "गीतिषु समाख्या[६], इति न्यायात् ।

तदनन्तरम् अभिनयार्थे पुत्राणां, वृत्यानां तथा अप्सरानां सर्जनम् अभिनेयार्थं कृतम् पश्चात् महेन्द्रध्वजमहोत्सवे प्रयोगं कृतम् । तदा दैत्याः विघ्नान् करोति स्म । तदा अभिनया विशाला नाट्यमण्डपा रचिताः । तद्यथा ज्येष्ठमण्डपोऽष्टत्तरशतहस्तायामो बभूव नाट्यमण्डपस्य भित्तिषु चित्रकर्मप्रसाधनं कृतं,मणयोऽपि खतिताः, मन्त्रजाल-गवाक्षादी व्यवस्था कृता च[७]। पूर्वरङ्गविधाने-नाभिनयस्य माङ्गलिकसमारम्भः कृतः । प्रथ तावद्वाद्यायोजनं गायनं च, पश्चात् नान्दीपाठः नृत्यं च समारब्धानि । अन्तत सूत्रधारपारिपार्श्विकादीनां संलापः नाट्यविषयस्य प्रकाशनं च कृते[८] । नाट्याभिनया चतुर्विधा – आङ्गिकः, वाचिकः, आहार्यः, सात्त्विकश्च । तत्र आङ्गिक अभिनयस्य भेदाः त्रय वर्तन्ते – शारीरः, मुखजः चेष्टाकृतश्च । तत्र शरीराभिनयेऽङ्गनामनेकानेकगतिस्थिति-विधानानामभिव्यक्तयो कृताः । तद्यथा नेत्रस्य षडत्रिंशत् विधानानि परिगणितानि सन्ति तद् अनुसृत्य दर्शनस्याष्टौ भदो उपकल्पिताः सन्ति । नेत्रताराभिरष्टविधानि पुटकर्माणि भूमिः सप्तविधानि भ्रूकर्माणि च व्याख्यतानि । अनया दिशा नाट्यविनोदस्य सूक्ष्मकला-तत्त्वाभिनिवेशः प्रदर्श्यते[९] । तथाहि अभिनयदृष्ट्या शिरोहस्तोरःपार्श्वकटीपादाः प्रधानाङ्गानि नेत्रभ्रूनासाधरकपोलचिबुकान्युपाङ्गानि । तेषां सर्वेषामभिनयकर्माणि सूक्ष्मरूपेण व्याख्यातानि

वागभिनयो नाट्यपुरुषस्य शरीरं वर्तते । रङ्गे वचनविन्यासो व्याकरणछन्दः-शास्त्रानुसारं शुद्धो भवत् । काव्यबन्धस्य समीचीनस्वरूपं भरतेन निर्दिष्टम् –

मृदुललितपदाढ्धं गूढशाब्दार्थहीनम् ।
जनपदं सुखबोध्यं युक्तिनमन्नृत्ययोज्यम् ।।
बहुकृतरसमार्गं सन्धिसन्धानयुक्तम् ।
भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ।।[१०]

नाट्ये भाषा एवं रसविषयेऽपि निर्धाणा प्रवर्तेते । नाट्ये नाट्याभिनयस्य प्राधान्यमासीत् । आहार्येणाभिनेतृणां वेश-भूषा, मानवेतरप्राणिनां प्रतिभाः, नदीपर्वतवनादीनां चित्राणि च समाविष्टानि सन्ति । अभिनेतृणां वेशैः रङ्गैः श्मश्रुरचनादिभिश्च तेषामभिनीतपात्राणां देशजातिव्यवसायादीनां परिचयः प्राप्यते स्म । सत्त्वाभिनये रसभावादीनां निष्पत्तये मनसः समाधिना रोमाञ्चाश्रूस्वरभेद-स्तम्भ-स्वेद-वेपथु-वैवर्ण्यप्रलयभावादयः प्रदर्शिताः । यथा –

आङ्गाद्यभिनयस्यैव यो विशेषःक्वचित्क्वचित् ।
अनुक्त उच्यते चित्रः स चित्राभिनयः स्मृतः ।।[११]

अभिनेतृणां वरणाय नियमासीत् । यथा –

सुशीला ज्ञानवन्तश्च तथा च प्रियदर्शनाः ।
कुमारराजभूमिषु प्रयोज्या भरतोत्तमाः ।।[१२]



कतिपयपुरुषाः स्त्रीणामभिनयः कुर्वन्ति स्म । किन्तु नाट्यसर्जनसमये ब्रह्मणा मञ्जुकेशी, सुकेशी, आदयः चतुर्विंशतिः अप्सराणामपि सर्जनं कृतवान् । पूर्वकाले अहर्निशं नाट्यं प्रवर्तनीयमासीत् । लोकसंग्रहार्थं अभिनेयार्थानिर्वारिता एव । तद्यथा नाट्यशास्त्रे कथितमस्ति यत् –

न कार्यं शयनं रङ्गे नाट्यधर्मं विजानता ।
केनचित्वचनार्थेन छेदमत्र प्रयोजयेत् ।।
यदा स्वपेदर्थवशादेकाकी सहितोऽपि वा ।
चुम्बनालिङ्गनादीनि रङ्गमध्ये न कारयेत् ।।
भोजनं सलिलक्रीडां तथा लज्जाकरं तु यत् ।
एवंविधं भवेद्यद्यत्तत्तरङ्गे न कारयेत् ।।
पितृपुत्रस्नूनाश्वश्रूदृश्यं यस्मात्तु नाटकम् ।
तस्मादेतानि सर्वाणि वर्जनीयानि यत्नतः ।।[१३]

नाट्यं सुपुण्यं, पवित्रं शुभंपापविनाशनश्च भवति एव प्राचीनकालतः वर्तमानकालपर्यन्तं नाट्ये सविशेषं स्वाभाविकतामादयानं प्रवर्तते । ईदृशस्य स्वाभाविक नाट्यस्याभिनिवेशः कालिदासस्य नाटकेऽपि प्रतिभाति । अभिज्ञान-शाकुन्तले द्वितीयाङ्के मृगयादृश्ये स्वाभाविकः वर्णनस्य दर्शनं भवति एव । यथा –

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दते बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्थवलीढैः श्रमवितृत्तमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।[१४]

नाट्यवदभिनयप्रधानं नृत्यं भवति । किन्तु नाट्ये वाक्याभिनयो रसाश्रयो भवति, नृत्ये च पदार्थाभिनयो भावाश्रयो भवति[१५]। नाट्ये सात्त्विकाभिनयस्य एवं नृत्ये आङ्गिकाभिनयस्य प्राधान्यं भवति । मालविकाग्निमित्रे नृत्याङ्गना-मालविका प्रथमम् उपगानं कृत्वा अनन्तरं चतुष्पदवस्तु गायति । यथा –

दुल्लहो पिओ मे तस्मिं भव हिअय णिरासं
अह्मो अपङ्गवो मे परिस्फुरइ किं वामओ ।
एसो सो चिरदिट्ठो कहं उण उवणैबव्वो
णाह मं पराहीणं तुई परिगणअ अतिण्हं ।।[१६]

प्राचीनकाले नृत्य-नृत्तश्च द्वौ भेदौ स्तः । शिवस्य सुप्रसिद्धः ताण्डवः एवं जगदम्बायाः लास्यः ।

यथा – रेचनकरङ्गहारैश्च नृत्यन्तं वीक्ष्य शाङ्करम् ।
सुकुमार प्रयोगेण नृत्यन्तीं चैव पार्वतीम् ।।[१७]

नृत्तस्य प्राचीनतमस्पष्टस्वरूपं सिन्धुसभ्यताया नर्तकीनां मूर्त्तिभिर्लभ्यते । नर्तक
तासां नर्तकीनां शरीरं विवसनमभवत् । नर्तकानां मूर्तयोऽपि प्राप्यन्ते । नर्तन
हावभावादिनामभिव्यक्तिरक्रियत । काललयाश्रितं नृत्तमपि प्रचलितमासीत् । नृत्येन
वाद्यस्य सङ्गतिः कृता । तदा समूहनृत्यस्य प्रचलनमासीत् । महाभरतीयुगे राजकु
नृत्यस्य प्रचलनमासीत् । स्वयमर्जुनो नृत्यशिक्षकं भूत्वा राजकुमारीणां शिक्षा अद
रामायणानुसारं अयोध्याकिष्किन्धालङ्कादिषु नगरीषु नागरिकाणां राज्ञां च मनोरञ्ज
प्रतिदिनं नृत्यायोजनं कृतम् । न केवलं मनुष्याणामपितु हस्तिनामपि नृत्यशिक्षणं समभव
ग्रीक्लेखक एरियनो लिखति – I have myself actually seen an elepha
playing on cymbals. While other elephants were dancing to his stra
: a cymbal had been attacjed to each foreleg of the performer and
third to what is called his trunk, and while he beat in proper tim
those on his two legs. The dancing elephants all the while kept dan
ing in a circle, and as they raised and curved their forelegs in tu
they too moved in proper time, following as musicial led.
परवर्तियुगेऽपि राजां सामन्तानां च मोनरञ्जनाय प्रायशोऽसंख्या नर्तक्यो नियुक्ताः । य
– "काश्मीराणां राजा हर्षः स्वयमेवनर्तकी शिक्षयत्[१९]। नृत्यसदृश्येव सङ्गीतस्
प्राकृतिकस्वरूपम् अनादिकालादेव प्रकीर्त्तितम्[२०]। वैदिकसंहितासु प्रायः देवाभिप्राय
स्तुतीनां सङ्कलनं वर्तते । तेषु क्वचित् कृषकाणां गीतानि संगृहीतानि यथा –

"शुनं नः फाला विकृष्यन्तु भूमिं शुनं कीनाशा अभियन्तु बाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ।।[२१]

वीणा वैदिकयुगस्य श्रेष्ठवाद्यमासीत् । वीणायां शततन्तूनां प्रवर्तनमक्रियत[२२]। महाभारते
भेरी-मृदङ्ग-पणवानकझर्झरक्रकच-दुन्दुभि-पुष्कर-पटहादयो युद्धोपयोगिनो ढौलस्य भे
बभूवुः[२३]। वीणायाः माहात्म्यं भासेन वर्णितम् । तद्यथा –

वीणा नाम समद्रोत्थितं रत्नम् उत्कण्ठितस्य
हृदयानुगता-सङ्कीर्णदोषरहिता विषयेषु गोष्ठी ।
क्रीडारसेषु मदनव्यसनेषु कान्ता
स्त्रीणां तु कान्तरतिविघ्नकरी सपत्नी ।।[२४]

इत्थम् अभिनयस्य अनेकानि तत्त्वानि संयोजनं कृत्वा नाट्योपयोगिता प्रतिपादनकरणा
प्रयत्नः कृताऽस्ति । "सकलहितकरणप्रवृत्त उत्साहसम्पदोपेत-स्तदभिवृद्ध
तत्प्रत्यूहापसिसारयिषया स्वविज्ञानक्रमोपारूढगुरुरूप ब्रह्मसर्वाधि-पतिपरमेश्वरविष
स्मृत्यौत्सुक्यधृतिमत्यादि लक्षणां व्यभिचारसरणिं बाह्यकरणीय-विषयं

जडतावहित्थप्रभृतिभावगणं पुरस्सरीकृत्य धर्मवीरानुप्रविष्टस्तदनुनिता-ङ्गिगवाचिकानुभावप्रकटनपूर्वं स्वप्रवृत्तिप्रयोजनमेव निरूपियति । प्रयोजनस्यैव प्रवर्तकत्वात् । अत्र अभिनयस्य विविधान् भेदान् चर्चयित्वा स्य स्वरूपविषये यत् किञ्चित् कथयितुम् प्रयत्नः कृताऽस्ति ।

---

सन्दर्भसूची –

१. जैनबौद्धधर्मानुयायिनो नाट्यधर्मप्रचारसाधनामिति स्वीकृतवन्तः । (कैथ संस्कृतड्रामा, पृ.४४)
२. न्यायसूत्रे – १/१/२४ ।
३. शतपथब्राह्मणे – ५/४/३/१ तथा च तैत्तिरीयसंहितायां – १/८/१५३ ।
४. वाजसनेयीसंहितायाम् – ३०/६, तैत्तिरीयब्राह्मणे – ३/४/२/१ ।
५. नाट्यशास्त्रम् – १/१७ ।
६. जैमिनिसूत्रे – २/१/३६ ।
७. नाट्यशास्त्रे द्वितीयाध्यायतः ।
८. तत्रैव पञ्चमाध्याये – ३४/१९७/२०६ ।
९. तत्रैव अष्टमाध्यायतः ।
१०. नाट्यशास्त्रे – १७/१२४ ।
११. तत्रैव – २५/१ ।
१२. तत्रैव – ३५/११ ।
१३. तत्रैव – २८/२८४, २८५, २८६, २८८ ।
१४. अभिज्ञानशाकुन्तले – २/४ ।
१५. नृत्यमङ्गसत्त्वचनाश्रयमपि भवति । रघुवंशे – १९/३६ ।
१६. मालविकाग्निमित्रम् – २/४ ।
१७. नाट्यशास्त्रम् – ४/२५३ ।
१८. एम्. क्रिण्डले आन्सिएण्ड् इण्डिया – पृ.२२१ ।
१९. राजतरङ्गिणी – ७/११/४० ।
२०. भागवते – १०/१८
२१. ऋग्वेदे – ४/५७/८ ।
२२. तत्रैव – १०/३२/४ ।
२३. श्रीमद्भगवद्गीतायाम् – १/१३, एवं च महाभारते भीष्मपर्वणि – ९५/४१ ।
२४. चारुदत्तम् – ३/१ ।

—०—

*एसोसियेट्प्रोफेसरः, साहित्यविभागः*
*श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावळम्,*
*जि.गिर-सोमनाथः (गुजरातम्)*